श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ षट्चत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षट्चत्वारिंशः सर्गः ॥

## सीतां रथ उपवेश्य वने परित्यक्तुं लक्ष्मणस्य गमनं गङ्गातटे समुपस्थानं च

ततो रजन्यां व्युष्टायां लक्ष्मणो दीनचेतनः।
सुमन्त्रमब्रवीद् वाक्यं मुखेन परिशुष्यता॥ **7.46.1** ॥

सारथे तुरगाञ्शीघ्रान् योजयस्व रथोत्तमे।
स्वास्तीर्णं राजवचनात् सीतायाश्चासनं शुभम्॥ **7.46.2** ॥

सीता हि राजवचनादाश्रमं पुण्यकर्मणाम्।
मया नेया महर्षीणां शीघ्रमानीयतां रथः॥ **7.46.3** ॥

सुमन्त्रस्तु तथेत्युक्त्वा युक्तं परमवाजिभिः।
रथं सुरुचिरप्रख्यं स्वास्तीर्णं सुखशय्यया॥ **7.46.4** ॥

आनीयोवाच सौमित्रिं मित्राणां मानवर्धनम्।
रथोऽयं समनुप्राप्तो यत्कार्यं क्रियतां प्रभो॥ **7.46.5** ॥

एवमुक्तः सुमन्त्रेण राजवेश्मनि लक्ष्मणः।
प्रविश्य सीतामासाद्य व्याजहार नरर्षभः॥ **7.46.6** ॥

त्वया किलैष नृपतिर्वरं वै याचितः प्रभुः।
नृपेण च प्रतिज्ञातमाज्ञप्तश्चाश्रमं प्रति॥ **7.46.7** ॥

गङ्गातीरे मया देवि ऋषीणामाश्रमाञ्शुभान्।
शीघ्रं गत्वा तु वैदेहि शासनात् पार्थिवस्य नः॥ **7.46.8** ॥

अरण्ये मुनिभिर्जुष्टे अवनेया भविष्यसि।
एवमुक्ता तु वैदेही लक्ष्मणेन महात्मना॥ **7.46.9** ॥

प्रहर्षमतुलं लेभे गमनं चाप्यरोचयत्।
वासांसि च महार्हाणि रत्नानि विविधानि च॥ **7.46.10** ॥

गृहीत्वा तानि वैदेही गमनायोपचक्रमे।
इमानि मुनिपत्नीनां दास्याम्याभरणान्यहम्॥ **7.46.11** ॥

वस्त्राणि च महार्हाणि धनानि विविधानि च।
सौमित्रिस्तु तथेत्युक्त्वा रथमारोप्य मैथिलीम्॥ **7.46.12** ॥

प्रययौ शीघ्रतुरगं रामस्याज्ञामनुस्मरन्।
अब्रवीच्च तदा सीता लक्ष्मणं लक्ष्मिवर्धनम्॥ **7.46.13** ॥

अशुभानि बहून्येव पश्यामि रघुनन्दन।
नयनं मे स्फुरत्यद्य गात्रोत्कम्पश्च जायते॥ **7.46.14** ॥

हृदयं चैव सौमित्रे अस्वस्थमिव लक्षये।
औत्सुक्यं परमं चापि अधृतिश्च परा मम॥ **7.46.15** ॥

शून्यामेव च पश्यामि पृथिवीं पृथुलोचन।
अपि स्वस्ति भवेत् तस्य भ्रातुस्ते भ्रातृवत्सल॥ **7.46.16** ॥

श्वश्रूणां चैव मे वीर सर्वासामविशेषतः।
पुरे जनपदे चैव कुशलं प्राणिनामपि॥ **7.46.17** ॥

इत्यञ्जलिकृता सीता देवता अभ्ययाचत।
लक्ष्मणोऽर्थं ततः श्रुत्वा शिरसा वन्द्य मैथिलीम्॥ **7.46.18** ॥

शिवमित्यब्रवीद्धृष्टो हृदयेन विशुष्यता।
ततो वासमुपागम्य गोमतीतीर आश्रमे॥ **7.46.19** ॥

प्रभाते पुनरुत्थाय सौमित्रिः सूतमब्रवीत्।
योजयस्व रथं शीघ्रमद्य भागीरथीजलम्॥ **7.46.20** ॥

शिरसा धारयिष्यामि त्रियम्बक इवौजसा।
सोऽश्वान् विचारयित्वा तु रथे युक्तान् मनोजवान्॥ **7.46.21** ॥

आरोहस्वेति वैदेहीं सूतः प्राञ्जलिरब्रवीत्।
सा तु सूतस्य वचनादारुरोह रथोत्तमम्॥ **7.46.22** ॥

सीता सौमित्रिणा सार्धं सुमन्त्रेण च धीमता।
आससाद विशालाक्षी गङ्गां पापविनाशिनीम्॥ **7.46.23** ॥

अथार्धदिवसे गत्वा भागीरथ्या जलाशयम्।
निरीक्ष्य लक्ष्मणो दीनः प्ररुरोद महास्वनः॥ **7.46.24** ॥

सीता तु परमायत्ता दृष्ट्वा लक्ष्मणमातुरम्।
उवाच वाक्यं धर्मज्ञा किमिदं रुद्यते त्वया॥ **7.46.25** ॥

जाह्नवीतीरमासाद्य चिराभिलषितं मम।
हर्षकाले किमर्थं मां विषादयसि लक्ष्मण॥ **7.46.26** ॥

नित्यं त्वं रामपार्श्वेषु वर्तसे पुरुषर्षभ।
कच्चिद् विनाकृतस्तेन द्विरात्रं शोकमागतः॥ **7.46.27** ॥

ममापि दयितो रामो जीवितादपि लक्ष्मण।
न चाहमेवं शोचामि मैवं त्वं बालिशो भव॥ **7.46.28** ॥

तारयस्व च मां गङ्गां दर्शयस्व च तापसान्।
ततो मुनिभ्यो वासांसि दास्याम्याभरणानि च॥ **7.46.29** ॥

ततः कृत्वा महर्षीणां यथार्हमभिवादनम्।
तत्र चैकां निशामुष्य यास्यामस्तां पुरी पुनः॥ **7.46.30** ॥

ममापि पद्मपत्राक्षं सिंहोरस्कं कृशोदरम्।
त्वरते हि मनो द्रष्टुं रामं रमयतां वरम्॥ **7.46.31** ॥

तस्यास्तद् वचनं श्रुत्वा प्रमृज्य नयने शुभे।
नाविकानाह्वयामास लक्ष्मणः परवीरहा।
इयं च सज्जा नौश्चेति दाशाः प्राञ्जलयोऽब्रुवन्॥ **7.46.32** ॥

तितीर्षुर्लक्ष्मणो गङ्गां शुभां नावमुपारुहत्।
गङ्गां सन्तारयामास लक्ष्मणस्तां समाहितः॥ **7.46.33** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षड्चत्वारिंशः सर्गः॥